दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-260 | 1 | जुलाई 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढकृष्णत्रयोदशी
आषाढः 28 प्रविष्टांशः मङ्गलमयः भवेत्

2 प्रधानमन्त्री नरेन्द्र मोदी न्यूजीलैण्ड-प्रधानमन्त्रिणा क्रिस्टोफर लक्सनेन सह द्विपक्षीयवार्तां कृतवान्, पञ्च (५) महत्त्वपूर्णाः सन्धि-ज्ञापनाः (MoUs) हस्ताक्षरिपाः

3 SHRIKHAND YATRA - श्रीखण्डयात्रां प्रति पूर्णप्रतिबन्धः, धारा १६३ (163) प्रवृत्ता इति सूचना

5 बिहारराज्यस्य डीएवी- पब्लिक- स्कूल- बरारी- भागलपुरविद्यालस्य विशालसभागारे छात्रपरिषदः अलंकरण-समारोहः सम्पन्नः

## रक्षा मन्त्री राजनाथ सिंहः स्वदेशीं स्टील्थ फ्रिगेट 'आईएनएस महेन्द्रगिरिं' नौसेनायाः पूर्वतटीयपोतसमूहे सम्मिलितं कृतवान्



रक्षा मन्त्री राजनाथ सिंहः गतदिने विशाखापत्तनमे स्वदेशीं स्टील्थ फ्रिगेट, 'आई.एन.एस. महेन्द्रगिरि' इति युद्धपोतं नौसेनायाः पूर्वतटीयपोतसमूहे सम्मिलितं कृतवान्। परियोजना १७-ए (17-A) इत्यस्य एतत् युद्धपोतं भारतस्य वर्धमानायाः सामुद्रिकशक्तेः स्वदेशीयरक्षाक्षमतायाश्च परिचायकमस्ति।अस्मिन् अवसरे श्रीसिंहः अवदत् यत् भारतं पारम्परिकरक्षाक्षमताः उन्नतप्रौद्योगिकीः च उभयं सुदृढं कृत्वा एकं सशक्तम्, आत्मनिर्भरं, भविष्यदर्थं च सज्जं रक्षाबलं निर्मान्ति अस्ति। सः अकथयत् यत् भविष्यस्य युद्धेषु कृत्रिमबुद्धिमत्तायाः (AI) अन्यासां च उदयमानप्रौद्योगिकीनां उपयोगः भवितुं शक्नोति, किन्तु तानि केवलं दृढसङ्कल्पेन सेनायाः साहसेन च एव जेतुं शक्यन्ते।रक्षामन्त्रिणा उक्तं यत् प्रायः सार्धैकवर्षस्य अन्तरे एव नौसेनायां ६ अग्रिमश्रेण्याः युद्धपोतानां सम्मिलनं देशस्य वर्धमानां पोतनिर्माणक्षमतां (जहाज निर्माण क्षमता) दर्शयति। 'आत्मनिर्भरभारत' इति अभियानस्य साफल्यविषये श्रीसिंहः अवदत् यत् आईएनएस महेन्द्रगिरि इत्यस्मिन् ७५ प्रतिशततः अधिकाः स्वदेशीयाः घटकाः उपयुक्ताः सन्ति। सः अवदत् यत् एतत् युद्धपोतं ब्रह्मोस-सुपरसोनिक-क्रूज़-क्षेपणास्त्रैः (मिसाइल), उन्नत-रडार-प्रणालीभिः, वायु-रक्षा-इलेक्ट्रॉनिक-युद्धप्रणालीभिः तथा आधुनिकैः स्वदेशीयैः अस्त्रैः सुसज्जितमस्ति। श्रीसिंहः अकथयत् यत् आईएनएस महेन्द्रगिरिः समुद्रात् आकाशे तथा समुद्रात् समुद्रतले अपि प्रहारं कर्तुं समर्थः अस्ति। अनेन हिन्दमहासागरे भारतस्य सामुद्रिकशक्तिः अधिका वर्धिष्यते।'ऑपरेशन सिन्दूर' (Operation Sindhu) इत्यस्य सन्दर्भे श्रीसिंहः स्पष्टं कृतवान् यत् भारतं स्वहितरक्षणे पूर्णतया समर्थम् अस्ति।

## केन्द्रीयस्वास्थ्यमन्त्री जे.पी. नड्डा अवदत्— स्वैच्छिक-परिवारनियोजनं स्वस्थपरिवारश्च सततविकासस्य सुदृढा आधारशिला अस्ति



केन्द्रीयस्वास्थ्य-परिवारकल्याणमन्त्री जगत्प्रकाशनड्डः (जे.पी. नड्डा) उक्तवान् यत् स्वैच्छिकं परिवारनियोजनम्, जागरूकनिर्णयः, स्वस्थपरिवारश्च समावेशिनः सततविकासस्य च सुदृढा आधारशिला (नींव) सन्ति। विश्वजनसङ्ख्यादिवसे सामाजिकमाध्यमे (सोशल मीडिया) प्रेषिते सन्देशे सः अवदत् यत् अस्मिन् वर्षे अस्य विषयः (थीम) मातुः शिशोः च कल्याणाय गर्भधारणयोः मध्ये स्वस्थं अन्तरालं (अन्तरं) तथा नियोजितपितृत्वम् अस्ति। सः अकथयत् यत् अस्य अभियानस्य उद्घोषः (नारा) "जब बच्चों में हो सही अंतराल, परिवार बने स्वस्थ और खुशहाल" (यदा बालेषु भवेत् समीचीनम् अन्तरालं, परिवारः भवेत् स्वस्थः प्रसन्नश्च) इति गुणवत्तापूर्ण-परिवारनियोजनसेवानां तथा जागरूकप्रजननिर्णयानां महत्त्वं प्रदर्शयते।विश्वजनसङ्ख्यादिवसस्य अवसरे स्वास्थ्य-परिवारकल्याणमन्त्रालयः प्रतिवर्षम् एकं विशेषं अभियानं सञ्चालयति। अस्य उद्देश्यं मातुः बालस्य च उत्तमस्वास्थ्यस्य कृते गर्भधारणयोः मध्ये उचितं अन्तरालं प्रोत्साहयितुं तथा च अनिच्छितगर्भधारणस्य प्रतिबन्धं (रोकथाम) कर्तुम् अस्ति।

## रेलमन्त्री अश्विनी वैष्णवः तेलङ्गानायाः मेधा रेल-कोच-विभागानां निर्माणसंयन्त्रस्य निरीक्षणं कृतवान्, 'मेक इन् इण्डिया' अभियाने बलं दत्तम्



रेलमन्त्री अश्विनी वैष्णवः तेलङ्गानायाः सङ्गारेड्डीमण्डलस्य (संगारेड्डी जिला) नन्दीगामक्षेत्रे स्थितायाः 'मेधा रेल कोच कलपुर्जा' (रेल-यान-अङ्ग-निर्माण-सुविधा) इत्यस्याः निर्माणस्थल्याः निरीक्षणं कृतवान्। ३७५ एकडपरिमित-भूभागे विस्तीर्णा एषः विशालः औद्योगिकघटकः (इकाई) रेलयानस्य आधुनिकीकरणे महत्त्वपूर्णां प्रगतिं प्रदर्शयति। स्वयात्रायाः समये श्रीवैष्णवः 'मेक इन् इण्डिया' (भारतं निर्माण्यताम्) इति अभियानस्य एकस्य महत्त्वपूर्णभागस्य रूपेण निजीक्षेत्रस्य उद्यमानां प्रोत्साहनाय सर्वकारस्य प्रतिबद्धतां दृढीकृतवान्।अस्याः सुविधायाः निरीक्षणयात्रायाः समये श्रीवैष्णवः अङ्ग-निर्माणप्रक्रियायाः (कलपुर्जा विनिर्माण) सूक्ष्मं पर्यवेक्षणं कृतवान्। सः श्रमिकैः सह संवादं अपि अकरोत्। श्रीवैष्णवः तेषां प्राविधिककौशलस्य, परिचालनगतकार्यप्रवाहस्य, अस्याः संस्थायाः समग्रनिर्माणपद्धतेः च विषये पृच्छाम् अकरोत्। अनेन सह सः 'मेधा' सङ्घटनेन अचिरात् एव विकसितस्य उन्नतस्य चालकविहीनवाहनस्य अपि निरीक्षणं कृतवान्। एतत् परिवहनव्यवस्थायाः आधुनिकीं प्रौद्योगिकीं (तन्त्रज्ञानं) दर्शयति।अस्मिन् निरीक्षणसमये रेलमन्त्रिणा वैष्णवेन सह केन्द्रीयमन्त्री जी. किशन रेड्डी, तेलङ्गानायाः भाजपा-अध्यक्षः रामचन्द्र रावः, सांसरिकः (सांसदः) कोण्डा विश्वेश्वर रेड्डी सदृशाः प्रमुखाः नेतारः अधिकारिणः च, तथा च निर्माणकम्पनीयाः बहवः प्रतिनिधयः अपि उपस्थिताः आसन्।

## सुभाषितम्

**यथा चित्तं तथा वाचो,**
**यथा वाचस्तथा क्रियाः।**
**चित्ते वाचि क्रियायां च,**
**साधूनामेकरूपता॥**

अर्थात्- साधु जन वही बोलते हैं जो उनके चित्त में होता है और जो उनके चित्त में होता है वही उनकी क्रिया में होता है। ऐसे सज्जनों के मन वचन एवं क्रिया एक समान होती है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्या कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## 'पितुः रक्तस्य प्रतिशोधं ग्रहीष्यामि'—खामनेईवर्यस्य अन्त्येष्टिसंस्कारात् परं मोजतबा अकरोत् प्रतिज्ञाम्


ईरानदेशस्य सर्वोच्चनेता (सुप्रीम लीडर) आयातुल्ला मोजतबा खामनेई शनिवारवासरे स्वपितुः पूर्वतन-सर्वोच्चनेतुः आयातुल्ला अली खामनेई इत्यस्य मृत्योः प्रतिशोधं (बदला) ग्रहीतुं शपथं स्वीकृतवान्। मोजतबा अवदत् यत् तस्य पितुः सर्वोच्चनेतुः च मृत्योः प्रतिशोधग्रहणं देशस्य आवश्यकता (मांग) अस्ति, एतत् च अवश्यमेव भवेत्। सः एतां बातं स्वस्य 'टेलीग्राम' (Telegram) इति सामाजिकमाध्यमस्य खाते (अकाउंट) प्रसारिते एकेन लिखितेन सन्देशेन अकथयत्।

# उपराष्ट्रपतिः सी.पी. राधाकृष्णनः अवदत्— लोकतन्त्रे मतभेदाः स्वाभाविकाः, किन्तु संविधानं जनकल्याणं च सर्वोपरि भवेत्



हिमसंस्कृतवार्ता। उपराष्ट्रपतिः सी.पी. राधाकृष्णनः उक्तवान् यत् लोकतन्त्रे मतभेदाः भवितुं स्वाभाविकाः सन्ति, किन्तु संविधानेन सह जनकल्याणाय प्रतिबद्धता सर्वोपरि एव भवेत्। सः बिहारस्य गयानगरे राज्यस्य लोकप्रशासन-ग्रामीणविकाससंस्थाने (BIPARD) अष्टादश्याः (18th) विधानसभायाः सदस्यानां कृते आयोजितस्य द्विदिवसीयस्य प्रशिक्षणकार्यक्रमस्य उद्घाटनं कुर्वन् एतां बातं अकथयत्। उपराष्ट्रपतिः राधाकृष्णनः अवदत् यत् एतादृशाः कार्यक्रमाः विधायकान् तेषां संविधानात्मकानां दायित्वानां प्रभावी रूपेण निर्वहणे समर्थान् कृत्वा लोकतान्त्रिकसंस्थाः सुदृढाः कुर्वन्ति।उपराष्ट्रपतिः बिहारराज्यं भारतस्य लोकतान्त्रिकयात्रायाः मार्गदर्शकत्वेन वर्णितवान्, विधायकान् च अस्य गौरवशालिनीं परम्परां (विरासतं) रक्षन्त्वा इति प्रहर्षितवान्। सः विधायकान् प्रति एतादृशानाम् अवसराणां निर्माणाय आह्वानं कृतवान्, येन बिहारराज्यं रोजगारस्य विकासस्य च केन्द्रं भवेत्, अन्येभ्यः राज्येभ्यः अपि प्रवासिश्रमिकाान् आक्रष्टुं (आह्वातुं) शक्नुयात्।उपराष्ट्रपतिः प्रश्नकालस्य, शून्यकालस्य, कार्यपरामर्शसमित्याः (कार्य सलाहकार समिति) च महत्त्वं प्रदर्श्य सदस्यान् विधायीकार्यं सुचारुरूपेण फलदायकरूपेण च सञ्चालयितुं आग्रहं कृतवान्। सः अवदत् यत् एताः संसदीयाः व्यवस्थाः प्रत्येकं विधायकं दलीयहितं विहाय स्व-निर्वाचनक्षेत्रैः सम्बद्धानां विषयाणाम् उत्थापनाय महत्त्वपूर्णावसरं प्रदास्यन्ति। सः सदस्यान् प्रति 'ए-आई' (कृत्रिमबुद्धिमत्ता), प्राकृतभाषा-संसाधनं (NLP), तथा 'नेवा' (NeVA - राष्ट्रिय ई-विधान अनुप्रयोगः) सदृशानां डिजिटल-विधायी-अभिप्रायनाम् उदयमानानां प्रौद्योगिकीनां स्वीकरणाय आह्वानं कृतवान्, येन विधायीकार्यप्रणाली अधिका कुशला, पारदर्शिका, नागरिककेन्द्रिता च भवितुं शक्नोति।

# प्रधानमन्त्री नरेन्द्र मोदी न्यूज़ीलैण्ड-प्रधानमन्त्रिणा क्रिस्टोफर लक्सनेन सह द्विपक्षीयवार्तां कृतवान्, पञ्च (५) महत्त्वपूर्णाः सन्धि-ज्ञापनाः (MoUs) हस्ताक्षरिता



हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्र मोदी न्यूजीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सनः च गतदिने ऑकलैण्डनगरे द्विपक्षीयवार्तां कृतवन्तौ। अस्याः वार्तायाः अनन्तरं द्वाभ्यां देशाभ्यां रक्षा, पशुपालन-डेयरी (दुग्धशाला), पर्यटनं, क्रीडा (खेल), आपत्कालीनप्रबन्धनं (आपदा प्रबंधन) च इति क्षेत्रैः सम्बद्धाः पञ्च (५) महत्त्वपूर्णाः सन्धि-ज्ञापनाः हस्ताक्षरिपाः। रक्षाक्षेत्रस्य सन्ध्या सैन्यसहयोगः रणनीतिकसहयोगेन च प्रवर्धिष्यते। पशुपालन-डेयरी-सम्बद्धा सन्धि अनुसन्धानं, नवोन्मेषं (नवाचार), उत्तमप्रविधीनां (तकनीकों) आदानप्रदानं च प्रोत्साहयिष्यति। पर्यटनसन्ध्या द्वाभ्यां देशाभ्यां मध्ये पर्यटनस्य यात्रायाः च सहयोगः वर्धिष्यते। क्रीडाक्षेत्रे एका संयुक्ता कार्ययोजना अपि अङ्गीकृता, यदा च आपत्कालीनप्रबन्धनसम्झौतेन आपत्कालीनसज्जता, साहाय्यं, रक्षणकार्याणि च सुदृढानि भविष्यन्ति।वार्तायाः समये प्रधानमन्त्री मोदी अवदत् यत् चत्वारिंशत् (४०) वर्षाणाम् अनन्तरं कस्यापि भारतीयप्रधानमन्त्रिणः न्यूजीलैण्डयात्रा द्वाभ्यां देशाभ्यां सम्बन्धे विलोभनीयः (ऐतिहासिकः) कालखण्डः अस्ति। सः अकथयत् यत् द्वौ देशौ सामरिकसहयोगं स्थापयितुं महत्त्वपूर्णं निर्णयं कृतवन्तौ, यत् भविष्यस्य सहयोगाय नूतनां दिशाम् अङ्कयिष्यति। प्रधानमन्त्री मुक्तव्यापारसन्धेः (FTA) दिशि जातायाः प्रगतेः प्रशंसां कुर्वन् अवदत् यत् भारतं न्यूजीलैण्डदेशः च हिन्द-प्रशान्तक्षेत्रे (Indo-Pacific) शान्तिं, स्थैर्यं, सुरक्षां च सुदृढं कर्तुं महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नुतः।न्यूजीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सनः अवदत् यत् प्रधानमन्त्रिणः मोदिनः एषा यात्रा द्वयोः देशयोः सम्बन्धं नूतनाम् उन्नतिं प्रदास्यति। सः अकथयत् यत् सामरिकसन्धितः व्यापारेण सह बहुषु क्षेत्रेषु सहयोगस्य परिधिः अधिका वर्धिष्यते।अस्मात् पूर्वं 'गवर्नमेण्ट हाऊस' इत्यत्र प्रधानमन्त्रिणः मोदिनः औपचारिकं स्वागतं कृतं तथा च तस्मै 'गार्ड ऑफ ऑनर' (सैन्यसम्मानः) दत्तः। प्रधानमन्त्री गतदिने भारतीयसमुदायं सम्बोधितवान्, उद्योग-क्रीडाजगतः प्रमुखाभिः विभूतिभिः साकं मिलितवान् च।

# केन्द्रीयगृहमन्त्री अमित शाहः नवदिल्ल्यां 'जयप्रकाश नारायण सार्वजनिक-पुस्तकालयस्य' उद्घाटनं कृतवान्, युवकाः पुस्तकालयैः सह सम्बद्धाः भवेयुं इति कृता प्रार्थना

केन्द्रीयगृहमन्त्री अमित शाहः व्यक्तित्वनिर्माणे पुस्तकालयानां महत्त्वपूर्णभूमिकां प्रदर्श्य युवापिढीं पुस्तकालयैः सह सम्बद्धं भवितुम् अवदत्। गतदिने नवदिल्ल्यां 'जयप्रकाश नारायण सार्वजनिक पुस्तकालयस्य' उद्घाटनं कुर्वन् सः अकथयत् यत् लोकनायकः जयप्रकाश नारायणः एकः महान् स्वतन्त्रतासेनानी, विचारकः, राष्ट्रवादी नेता च आसीत्, यः देशाय उल्लेखनीयं योगदानं दत्तवान्। गृहमन्त्री अवदत् यत् देशं तस्य जनान् च अवगन्तुं पठनम् आवश्यकम् अस्ति। सः राष्ट्रनिर्माणे पुस्तकालयानां भूमिकां प्रदर्श्य अकथयत् यत् पुस्तकालयाः आधुनिकशिक्षायाः सह जनसमुदाये देशस्य संस्कृतेः ज्ञानस्य च प्रसारस्य सशक्तं माध्यमं सन्ति। श्री अमित शाहः अवदत् यत् राष्ट्रनिर्माणे योगदानं ददाति, देशाय च गौरवं आनयति तादृश्यः सर्वाः गतिविधयः ज्ञाने आधारिताः सन्ति, यत् ज्ञानं व्यवहारे प्रयुक्तं सत् बुद्धिमत्तायां विवेके च परिवर्तितं भवति। सः अकथयत् यत् पुस्तकालयाः एतादृशस्य ज्ञानस्य एकं महत्त्वपूर्णं स्रोतः सन्ति। श्री अमित शाहः रेखाङ्कितं कृतवान् यत् सर्वकारः छात्रेषु पठनसंस्कृतिं प्रोत्साहयितुं पुस्तकालयान् विद्यालयैः सह योजयितुं प्रयासान् कृतवान्। सः अवदत् यत् गान्धिनगर-लोकसभाक्षेत्रस्य प्रत्येके ग्रामे पुस्तकालयाः उद्घाटिताः सन्ति, येषु प्रत्येके प्रायः ३ तः ४ सहस्रं पुस्तकानि सन्ति। एते पुस्तकालयाः एकेन केन्द्रीयपुस्तकालयेन सह सम्बद्धाः सन्ति, यत्र एकलक्षपञ्चविंशतिसहस्रतः (१,२५,०००) अधिकानां पुस्तकानां सङ्ग्रहः अस्ति। श्री अमित शाहः दिल्लीसर्वकारं प्रति आग्रहं कृतवान् यत् सः नगरस्य सर्वान् पुस्तकालयान् परस्परं योजयितुं तथा च तान् विद्यालयैः सह सम्बद्धं कर्तुं एकां व्यापकां योजनां निर्मातु। सः अकथयत् यत् पुस्तकप्रेमिणः पुस्तकालयैः सह जुष्टुं प्रोत्साहयितुं एका सुव्यवस्थिता कार्ययोजना सज्जीकरणीया। सः जयप्रकाश नारायण सार्वजनिक पुस्तकालयस्य कर्मचारिणः अवदत् यत् ते नवदिल्ल्याः समीपस्थानां दशानां विधानसभाक्षेत्राणां सर्वान् विद्यालयान् प्रति गच्छेयुः, यूनान् पुस्तकालयेन सह योजयेयुः, तान् आगन्तुं प्रेरयेयुः च। एकदा युवसु पठनस्य अभ्यासः (आदत) विकसितः चेत्, ते स्वयमेव एतत् अनुवर्तिष्यन्ति।केन्द्रीयगृहमन्त्री अवदत् यत् जयप्रकाश नारायण सार्वजनिक पुस्तकालये ३२ सहस्रतः अधिकानां पुस्तकानां सङ्ग्रहः अस्ति। सः अकथयत् यत् पुस्तकालये शोधकर्तृभ्यः समर्पितसुविधाः, एकं आधुनिकं बहुद्देशीयं प्रेक्षागृहं (सभागारः), समकालीनपठनक्षेत्रं, बालक्षेत्रं, एकं शोधकेन्द्रं तथा च एककोटि (१० मिलियन) अनलाइन-पुस्तकानां प्राप्यतां ददाति एतादृशं 'ई-पुस्तकालयम्' (E-Library) अस्ति। पुस्तकालये सर्वत्र निःशुल्कं 'वाई-फाई' (Wi-Fi) उपलभ्यते। सः अवदत् यत् तत्र बहवः मॉनिटराः (Monitors) अपि स्थापिताः सन्ति, येन आगन्तुकः अध्ययनसमये टिप्पणीं (Notes) लेखितुं, सामग्रीं डाउनलोड् कर्तुं तथा च स्वविचारान् अधिकं विकसितं कर्तुं शक्नोति। एषः पुस्तकालयः अत्याधुनिकया आरएफआईडी (RFID) आधारितया पुस्तकप्रबन्धनप्रणाल्या सुसज्जितः अस्ति।अस्मिन् अवसरे दिल्ल्याः मुख्यमन्त्री रेखा गुप्ता, दिल्ल्याः सार्वजनिकपरिवहनविभागस्य मन्त्री परवेश वर्मा, नवदिल्लीनगरपालिकापरिषदः (NDMC) अध्यक्षः केशव चन्द्रः गण्यातिगण्याः उपस्थिताः आसन्

# HP GOVT CBSE SCHOOLS- सी. बी. एस. ई. मानकानुसारं भविष्यन्ति शिक्षकाणां नियुक्तयः, पदानां सृजन-युक्तिकरणाय स्वीकृतिः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य सर्वकारीय- सीबीएसई- सम्बद्धविद्यालयेषु केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड इत्यस्य मानकानुगुणं शिक्षकाणां नियुक्तयः युक्तिकरणानि च विधास्यन्ते। राज्यसर्वकारेण एतेषु विद्यालयेषु शिक्षकाणां विविधानां पदानां सृजनाय युक्तिकरणाय च स्वीकृतिः प्रदत्ता। शिक्षानिदेशालयेन अस्मिन् सन्दर्भे आदेशान् प्रसार्य सर्वान् उपशिक्षानिदेशकान् आवश्यकाचरणाय निर्दिष्टाः। सर्वकारस्य एषः निर्णयः प्रदेशस्य सीबीएसई- सम्बद्धविद्यालयेषु शिक्षणव्यवस्थायाः सुदृढीकरणाय शिक्षक-विद्यार्थि-अनुपातस्य सन्तुलनाय च प्रमुखा दिशि मन्यते।

## बहुषु विद्यालयेषु विषयविशेषज्ञ-शिक्षकाणां न्यूनता

सुदीर्घकालात् बहुषु विद्यालयेषु विषयविशेषज्ञ-शिक्षकाणां शून्यता अनुभूयते स्म। एतादृश्याम् स्थितौ नूतनपदानां सृजनेन उपलब्धकर्मचारिणां युक्तिकरणेन च अस्याः समस्यायाः निवारणस्य आशा अस्ति। शिक्षासचिवस्य राकेशकंवरस्य पक्षतः प्रसारितायाः स्वीकृत्याः आधारेण एषा प्रक्रिया आरब्धा अस्ति। आदेशानुसारं हिमाचलप्रदेशे सीबीएसई- सम्बद्ध- उत्कृष्ट-विद्यालयानां योजनायाः अन्तर्गतं निर्धारित-मानकानुसारं विद्यालयवारं श्रेणीवारं च शिक्षकाणां पदानां पुनर्सङ्घटनं विधास्यते। यत्र आवश्यकता भविष्यति तत्र नूतनानि पदानि सृज्यन्ते, यत्र च कतिपयेषु विद्यालयेषु उपलग्धानां शिक्षकाणां युक्तिकरणं कृत्वा आवश्यकतायुक्तेषु संस्थानेषु तेषां नियुक्तिः विधास्यते।

# भारतीयमूलस्य नासा-अन्तरिक्षयात्री अनिल मेननः 'सोयुज एमएस-29' अन्तरिक्षयानेन अन्तर्राष्ट्रिय-अन्तरिक्षस्थानकं प्रति गमिष्यति



भारतीयमूलस्य नासा (NASA) इति संस्थायाः अन्तरिक्षयात्री अनिल मेननः आगामी-जुलाई-मासस्य १४ दिनाङ्के कजाकिस्तानदेशस्य 'बैकोनूर अन्तरिक्ष प्रशिक्षण केन्द्रात्' अन्तर्राष्ट्रिय-अन्तरिक्षस्थानकं (ISS) प्रति अष्टमासीय-अभियानाय प्रस्थास्यति। सः प्योत्र दुब्रोव, अन्ना किकिना च इति अन्तरिक्षयात्रिभ्यां सह रूसदेशस्य अन्तरिक्षसंस्थायाः 'रोस्कोस्मोस' (Roscosmos) इत्यस्याः 'सोयुज एमएस-29' (Soyuz MS-29) इति अन्तरिक्षयाने उपविश्य अन्तरिक्षयात्रां करिष्यति।अन्तरिक्षस्थानके निवाससमये, श्रीमेननः दीर्घकालीन-अन्तरिक्षयात्रायाः शारीरिकाणां प्रभावाणाम् अध्ययनं करिष्यति। विशेषतः सः सूक्ष्मगुरुत्वाकर्षणस्य (Microgravity) अन्तरिक्षयात्रिणां रक्तप्रवाहे, शिरासंरचनायां, रक्तसंरचनायां च जायमानं प्रभावं विज्ञास्यति। सः अन्तरिक्षस्थानकस्य पेयजलयोजनायाः उपयोगं कृत्वा अन्तःशिराद्रवस्य (Intravenous fluid) निर्माणप्रविधीनां परीक्षणे अपि साहाय्यं करिष्यति। सः अल्ट्रासाउण्ड-परीक्षणानि अपि विधास्यति, येन भविष्यस्य अन्तरिक्षअभियानेषु पृथिव्याः चिकित्सासहायतायाः आवश्यकता समाप्ता भवितुं शक्नोति।मिनियापोलिसनगरे जातः अनिल मेननः आपत्कालीनचिकित्सायाः चिकित्सकः (Emergency Medicine Physician) तथा च अमरीकी-अन्तरिक्षबले (US Space Force) कर्नल-पदे आसीनः अस्ति। ४९ वर्षीयः मेननः २०१४ तमे वर्षे नासा-संस्थायां 'फ्लाइट सर्जन' (Flight Surgeon) रूपेण स्वकीयवृत्तिं (Career) आरब्धवान् तथा च अन्तर्राष्ट्रिय-अन्तरिक्षसेवाकेन्द्रे निवसितवद्भिः कार्यं कुर्वद्भिः च अन्तरिक्षयात्रिभिः साकं कार्यं कृतवान्। मेननः २०१८ तमे वर्षे 'स्पेसएक्स' (SpaceX) संस्थायां सम्मिलितः अभवत्। दिसम्बर २०२१ मध्ये तस्य चयनं नासा-अन्तरिक्षयात्रिरूपेण अभवत्, ततः परं च सः वर्षद्वयस्य प्रशिक्षणं प्रारभत।

# होटल-विपणि (मॉल)-चिकित्सालयेषु 'हरितभवनसंहिता प्रवृत्ताः, उल्लङ्घने दण्डशुल्कम् , संशोधिताः नियमाः प्रसारिताः

हिमसंस्कृतवार्ताः — शिमला । हिमाचलप्रदेशसर्वकारेण ऊर्जासंरक्षणं पर्यावरणानुकूल-निर्माणं च प्रवर्धयितुं हरितभवनसंहिता (ग्रीन बिल्डिंग कोड) इत्यस्य अनुपालनम् अनिवार्यं विहितम्। नगर-एवं-ग्रामनियोजनविभागेन (TCP) प्रसारितेन 'संशोधन नियम, २०२६' इत्यस्य अन्तर्गतम् अधुना बृहद्भवनानां कृते 'हिमाचलप्रदेश ऊर्जासंरक्षण भवन कोड' इत्यस्य अनुपालनं करणीयम् भविष्यति। नियमानाम् अवहेलनां कुर्वतां विनिर्मातॄणां (डेवलपर्स) विरुद्धं दण्डशुल्केन सह दृढकार्यविधेः प्रावधानं कृतम् अस्ति। भवनस्य मानचित्रे (नक्शे) हरितभवनसंहितायाः प्रावधानम् अनिवार्यं विहितम्, अन्यथा मानचित्रं स्वीकृतं न भविष्यति। नूतन-अधिसूचनानुसारं वासगृहाणि, विहारस्थलाणि (रिसॉर्ट्स), चिकित्सालयाः, आपणविपणयः (शॉपिंग मॉल्स), व्यावसायिककार्यालयाः, शैक्षणिकसंस्थानानि, बहुचित्रागाराणि (मल्टीप्लेक्स), सार्वजनिकानि भवनानि बृहन्तः प्रासादप्रकल्पाः (रियल एस्टेट प्रोजेक्ट्स) च ऊर्जादक्षभवनमानकानाम् अनुपालनं विधास्यन्ति।

## ऊर्जापरीक्षकात् (एनर्जी ऑडिटर) प्रमाणीकरणम् अनिवार्यम्

निर्माणकार्यस्य आरम्भात् पूर्वं तथा अधिभोगप्रमाणपत्रं (ऑक्यूपेंसी सर्टिफिकेट) स्वीकरणात् प्राक् भवनस्य रूपरेखायाः (डिजाइन) सत्यापनं बी.ई.ई. (BEE) अथवा राज्यसर्वकारतः अधिकृतेन ऊर्जापरीक्षकेण (एनर्जी ऑडिटर) कारयितुम् अनिवार्यं भविष्यति। परीक्षकस्य प्रमाणपत्रं विना निर्धारितप्रक्रिया पूर्णा न मन्यते। सर्वकारेण हरितभवनस्य प्रवर्धनाय प्रोत्साहनस्य दण्डस्य च द्वयोः व्यवस्था कृता अस्ति। अधिकृतसंस्थातः निर्धारितां 'ग्रीन रेटिंग' (हरितमूल्याङ्कनं) प्राप्नुवद्भ्यः प्रकल्पेभ्यः ०.२५ अतिरिक्त-एफ.ए.आर. (FAR) इत्यस्य लाभः प्रदास्यते। अपरपक्षे, अतिरिक्त-एफ.ए.आर. लाभं प्राप्यापि यदि विनिर्माता निर्धारितं हरितमूल्याङ्कनं प्राप्तुं न शक्नोति, तर्हि तस्मै सामान्ययोजनाशुल्कस्य (प्लानिंग फीस) १० गुणितं यावत् दण्डशुल्कं दातव्यं भविष्यति। संशोधितेषु नियमेषु एतदपि स्पष्टीकृतं यत् प्रब्याजी (प्रीमियम) एफ.ए.आर. व्यवस्था केवलं वैधानिकपरियोजनानां कृते एव भविष्यति। अस्य उपयोगः कस्यापि अवैधनिर्माणस्य नियमितीकरणाय (लीगल करने के लिए) कर्तुं न शक्यते। अतिरिक्त-एफ.ए.आर. इत्यस्य लाभः केवलं नूतनप्रकल्पेषु अथवा तेषां परियोजनानां भागेषु एव प्राप्स्यते, यत्र निर्माणकार्यम् अद्यापि आरब्धं नास्ति।

## भवननिर्माणकाले एतासां प्रमुखाणां वार्तानाम् अनुपालनम् अनिवार्यम्

> विद्युतः न्यूनव्ययाय ऊर्जादक्षरूपरेखायाः (डिजाइन) उपकरणानां च उपयोगः।
> प्राकृतिकप्रकाशस्य वातायनस्य (वेंटिलेशन) च प्रवर्धनम्, येन विद्युतः आवश्यकता न्यूना भवेत्।
> ऊर्जादक्षाः वातानुकूलन-प्रणाल्यः (AC), दीपनव्यवस्था (लाइटिंग) विद्युत्प्रणाल्यश्च अनिवार्याः।
> भित्तिषु, छदिषु, वातायनेषु च श्रेष्ठं ऊष्मारोधनम् (इंसुलेशन), येन ग्रीष्मस्य शीतस्य च प्रभावः न्यूनः स्यात्।
> जलसंरक्षणार्थं वर्षजलसङ्ग्रहणं (रेन वाटर हार्वेस्टिंग) जलरक्षक-फिटिंग्स इत्येतेषाम् उपयोगः।
> सौर-ऊर्जायाः अन्यासां नवीकरणीय-ऊर्जास्रोतासां च प्रोत्साहनम्।
> निर्माणकाले तदुत्तरं च कार्बन-उत्सर्जनस्य ऊर्जाव्ययस्य च न्यूनीकरणाय व्यवस्था।

# HP MONSOON UPDATE- साङ्ग्ला-क्षेत्रे भग्नः २०० पाद-परिमितः दीर्घः सेतुः, प्रचण्डवृष्टिः अभवत् कारणम्

हिमसंस्कृतवार्ताः- रिकांगपिओ। किन्नौरमण्डलस्य पर्यटनस्थलस्य साङ्गलायाः 'टोण्टोङ्गे' उपनदस्य (खड्ड) समीपे बस-स्थानकस्य पार्श्वे निर्मितः प्रायः २०० पाद-परिमितः दीर्घः 'वैली' सेतुः (वैली ब्रिज) शुक्रवासरे चिलरात्रौ क्षतिग्रस्तः अभवत्। सेतोः भङ्गे एकं प्रमुखं कारणं गतेभ्यः त्रिचतुर्भ्यः दिनेभ्यः क्षेत्रे जायमाना प्रचण्डवृष्टिः अस्ति। वृष्ट्या टोण्टोङ्गे-उपनदस्य जलस्तरस्य वर्धनात् वेगेन भूमिकर्तनं संजातम्, येन सेतुः भग्नः। अस्यां घटनायां कोऽपि जनहानिः न अभवत्। एषः मार्गः 'बॉर्डर रोड ऑर्गनाइजेशन' इत्यस्य अधीने वर्तते। प्रशासनेन अस्याः घटनायाः परं सर्वेषां लघूनां बृहतां च वाहनानाम् आवागमनम् अतिरिक्त-वैकल्पिकमार्गेण कारितम्।

# कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालये

## स्नातकोत्तरशोधपरिषदः सभायां बहवः महत्त्वपूर्णनिर्णयाः



- **अधुना विश्वविद्यालये विश्वविद्यालयानुदानायोगस्य (यूजीसी) -२०२२-विनियमावल्यानुसारमेव भविष्यति शोधकार्यम्**
- **पञ्चसप्ततिः (७५) गवेषकाणां शोधबीजानी शोधप्रारूपाणि च परीक्षितानि; केषाञ्चित् संशोधनस्य निर्देशः, अन्येषामनुमोदनम्**

**हिमसंस्कृतवार्ता दरभङ्गा, डॉ०राघवनाथझा।** कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालयस्य दरबारसभागारे शनिवासरे कुलपतिना प्रो० लक्ष्मीनिवासपाण्डेयमहाभागेण अध्यक्षतायां स्नातकोत्तरशोधपरिषदः (पीजीआरसी) सभा सम्पन्ना। एषा सभा विश्वविद्यालयस्य शोधव्यवस्थायाः दृष्ट्या विशेषमहत्त्वपूर्णा अभवत्। बिहारराज्यस्य विभिन्नजनपदेभ्यः, उत्तरप्रदेशात्, राजस्थानात्, गुजरातात्, उत्तराखण्डात्, देहल्याः तथा अन्येभ्यः प्रदेशेभ्यः समागतैः विषयविशेषज्ञैः शोधसम्बद्धेषु व्यावहारिकेषु सैद्धान्तिकेषु च विषयेषु सविस्तरः विमर्शः कृतः तथा बहवः हितकराः परामर्शाः प्रदत्ताः।

विमर्शस्यानन्तरं सर्वसम्मत्या निर्णीतं यदधुना विश्वविद्यालये समस्तं शोधकार्यं विश्वविद्यालयानुदानायोगस्य (यूजीसी)–२०२२-विनियमावल्यानुसारमेव सम्पादयिष्यते। एषा विनियमावली २०२२–२३ शैक्षणिकसत्रादारभ्य प्रवर्तमाना इति स्वीकृता। अतः पूर्वप्रचलिता २०१६-विनियमावली निरस्तेति परिषदः निर्णयः अभवत्।

विश्वविद्यालयस्य जनसम्पर्काधिकारी डॉ० निशिकांतमहाभागः अवदत् यत् परिषदि मूलतः षट् प्रस्तावाः प्रस्तुताः। १२ फरवरी २०२५ दिनाङ्के सम्पन्नायाः पूर्वपरिषदः सभायाः निर्णयाः अनुमोदिताः, तेषां कार्यान्वयनाय पुनः सर्वसम्मतिरपि प्राप्ता। प्रायः द्वादशभ्यः गवेषकेभ्यः शोधकार्यस्य अवधिविस्तारः प्रदत्तः। कतिपयेषां शोधबीजानि शोधप्रारूपाणि च आवश्यकसंशोधनार्थं पुनः प्रेषितानि; संशोधनानन्तरं तेषामनुमोदनमपि कृतम्। अन्येषामपि गवेषकाणां शोधबीजानी यथावत् परिषदेन अनुमोदितानि। पर्यवेक्षकाणां चयनसम्बन्धेऽपि सविस्तरः विचारविमर्शः सम्पन्नः।शोधप्रभारी धर्मशास्त्रविभागाध्यक्षश्च प्रो० दिलीपकुमारझामहाभागः स्वागतभाषणं प्रस्तुतवान् तथा सभायाः सञ्चालनमकरोत्। अस्याः सभायाः मुख्यातिथिरासीत् सोमनाथसंस्कृतविश्वविद्यालयस्य (गुजरात) पूर्वकुलपतिः प्रो० अर्कनाथचौधरीमहाभागः। तेन शोधस्य गुणात्मकविकासाय, मौलिकतावर्धनाय तथा शैक्षणिकगुणवत्तावृद्धये बहवः महत्त्वपूर्णाः परामर्शाः प्रदत्ताः।अस्यां परिषदि २०२२–२३ शैक्षणिकसत्रस्य पञ्चसप्ततिः (७५) गवेषकाणां शोधबीजानी शोधप्रारूपाणि च प्रस्तुतानि। तेषु विद्यावाचस्पत्युपाधेः अष्ट (८) तथा विद्यावारिध्युपाधेः सप्तषष्टिः (६७) गवेषकाः समाविष्टाः आसन्।उल्लेखनीयं यत् परिषदः कुलद्वात्रिंशत् (३२) सदस्येषु एकत्रिंशत् (३१) सदस्याः सभायामुपस्थिताः आसन्।उपस्थितेषु प्रमुखेषु विद्वत्सु प्रो० अर्कनाथचौधरी, प्रो० राजीवरञ्जनसिंह, प्रो० शिवाकान्तझा, प्रो० व्यासमिश्र, प्रो० शङ्करकुमारमिश्र, प्रो० उपेन्द्रकुमारत्रिपाठी, प्रो० उपेन्द्रझा, प्रो० रामपूजनपाण्डेय, प्रो० महेशझा, प्रो० चन्द्रशेखरपाण्डेय, डॉ० राजेश्वरदुबे, प्रो० शत्रुघ्नत्रिपाठी, प्रो० दिलीपकुमारझा, प्रो० पुरेन्द्रवारिक, प्रो० दयानाथझा, प्रो० प्रियव्रतमिश्र, प्रो० उमेशशर्मा, डॉ० सीताचरणझा, डॉ० ध्रुवकुमारमिश्र, डॉ० धीरजकुमारपाण्डेय, डॉ० सुधीरकुमार, डॉ० रामनिहोराराय, डॉ० शम्भुशरणतिवारी, डॉ० शिवलोचनझा, कुलसचिवः डॉ० दिनेशकुमारझा, ओएसडी डॉ० वरुणकुमारझा तथा डॉ० रामसेवकझा इत्यादयः समुपस्थिताः आसन्।परिषदः अस्याः सभायाः निर्णयाः विश्वविद्यालयस्य शोधव्यवस्थायाः आधुनिकीकरणे, शैक्षणिकगुणवत्तायाः अभिवृद्धौ, यूजीसी-विनियमावलीनां प्रभावी-कार्यान्वयने च महत्त्वपूर्णं सोपानं भविष्यन्तीति विद्वद्भिः अभिप्रेतम्।

# SHRIKHAND YATRA - श्रीखण्डयात्रां प्रति पूर्णप्रतिबन्धः, धारा १६३ (163) प्रवृत्ता इति सूचना



**हिमसंस्कृतवार्ताः — रामपुरम्।** श्रीखण्डयात्रां (Shrikhand Yatra) प्रति प्रशासनेन पूर्णरूपेण प्रतिबन्धः स्थापितः अस्ति। एतस्य प्रतिबन्धस्य अभावेऽपि श्रीखण्डयात्रां कर्तुं स्थानीयजनाः गूढरूपेण (चोरी-छिपे) 'गानवी-फाञ्चा' इति पथमार्गेण गच्छन्तः सन्ति। एतादृश्यां स्थितौ कस्यापि दुर्घटनायाः (हादसा) सम्भावना सदैव वर्तते। क्षेत्रे सुरक्षादृष्ट्या 'धारा १६३' (BNS भारतीय नागरिक सुरक्षा संहितायाः धारा १६३, या पूर्वं CRPC धारा १४४ आसीत्) प्रवृत्ता इति सूचना प्राप्ता अस्ति। सुदीर्घकालात् स्थानीयजनैः अस्मात् एव क्षेत्राद् श्रीखण्डयात्रां प्रारब्धुं निरन्तरं याचना क्रियते स्म।

## ग्रामपञ्चायतस्य उपप्रधानेन दत्ता सूचना

ग्रामपञ्चायतस्य उपप्रधानेन सुभाषमहोदयेन ज्ञापितं यत् प्रशासनस्य आधिकारिक-आदेशानुसारं क्षेत्रे यात्रां विधातुं पूर्णतया निषेधः (प्रतिबन्धः) विहितः अस्ति। तेन जनसामान्यं प्रति आग्रहितं यत् कोऽपि जनः नियमावहेलनां कृत्वा यात्रां न करोतु, यतोहि आरक्षिबलेन (पुलिस) प्रशासनस्य अधिकारिभिः च क्षेत्रे तीक्ष्णं निरीक्षणं क्रियते। नियमोल्लङ्घनं कुर्वतां विरुद्धं वैधानिकी कार्यविधिः अपि विधास्यते। ऋतुप्रतिकूलत्वात् मार्गस्य दुरवस्थायाश्च कारणात् एषः निर्णयः जनसुरक्षायै अतीव आवश्यकः आसीत्।

# फीफा विश्वचषके नॉर्वेदेशं पराजित्य इंग्लैंडदेशः उपांत्यचक्रे प्रविष्टः

**हिमसंस्कृतवार्ता।** फीफा विश्वचषके नॉर्वेदेशं पराजित्य इंग्लैंडदेशः उपांत्यचक्रे प्रविष्टवान्। नॉर्वेदेशः नॉकआउट-चक्रे प्रतियोगात् बहिर्भूतः अभवत् तथा च इंग्लैंडदेशेन नॉर्वेदेशः २-१ इत्यनेन अंतेन पराजितः। अतिरिक्तसमये (एक्स्ट्रा टाइम) अस्य मैच-क्रीडायाः निर्णयः अभवत्।इंग्लैंडदेशाय उभौ गोल-कन्दुकौ जूट बेलिंघम इत्यनेन कृतौ। नॉर्वेदेशाय एकमात्रं गोल-कन्दुकं आंद्रेस शेलदेरप इत्यनेन कृतम्। विशेषतः सूच्यते यत् उपांत्यचक्रे १६ जुलै दिनाङ्के इंग्लैंडदेशस्य प्रतिस्पर्धा अर्जेंटीनादेशेन अथवा स्विट्जरलैंडदेशेन सह भविष्यति।



# बिहारराज्यस्य डीएवी- पब्लिक- स्कूल- बरारी- भागलपुरविद्यालस्य विशालसभागारे छात्रपरिषदः अलंकरण-समारोहः सम्पन्नः





**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुर, बिहार**
बिहारराज्यस्य डीएवी- पब्लिक- स्कूल- बरारी- भागलपुरविद्यालस्य विशालसभागारे शैक्षणिक- सत्रस्य २०२६–२७ इत्यस्य कृते विद्यार्थीपरिषदः छात्रछात्राणाम् अलंकरणसमारोहः भव्यतया आयोजितः। समारोहस्य शुभारम्भं मुख्यातिथिः एस. के. झा महाभागः, प्राचार्यः सह क्षेत्रीयाधिकारी, पटना-प्रक्षेत्रं, विशिष्टातिथयः मृणालकान्तः, प्राचार्यः, डीएवी पब्लिक स्कूल, जमुई, शिवानन्द मिश्रः, प्राचार्यः, डीएवी पब्लिक स्कूल, एन. टी. पी. सी., कहलग्रामः, आदित्यनन्दन सरस्वती, प्राचार्यः, डीएवी. पब्लिक स्कूल, मथुरापुरं, नेहा नारंग नैयर, प्राचार्या, डीएवी पब्लिक स्कूल, सुलतानगञ्जः, दीपप्रज्वलनेन कृतवन्तः।
विद्यालयस्य प्राचार्यः सह सहायक क्षेत्रीयाधिकारी अनिल कुमारमहोदयः सर्वेषाम् अतिथीनां पुष्पगुच्छैः सादरं स्वागतं कृतवान्। स्वीये स्वागतभाषणे सः समागतान् सर्वान् अतिथीन् अभिनन्द्य नवनिर्वाचितस्य विद्यार्थीपरिषदः सर्वान् सदस्यान् हार्दिकाभिः शुभकामनाभिः अभिनन्दितवान्। तेषाम् उज्ज्वलभविष्यस्य कामनाम् अकरोत्। सः उक्तवान् यत् विद्यार्थीपरिषद् नेतृत्वस्य, अनुशासनस्य, सेवाभावस्य उत्तरदायित्वबोधस्य च विकासाय प्रभावी माध्यमम् अस्ति।
अस्मिन् अवसरे विद्यालयस्य छात्रछात्राभिः स्वागतगीतम्, कजरीगीतम्, पञ्जाबीभाङ्गडानृत्यम्, राजस्थानी- लोकनृत्यं च मनोहरतया प्रस्तुतं, येन उपस्थितानाम् अतिथीनाम् अभिभावकानां च मनांसि आकृष्टानि। विद्यालयस्य ऋग्, यजुः, साम, अथर्वसदनेषु प्रत्येकं सदनात् अष्टादश- अष्टादश छात्रछात्राः नायकः, उपनायक, छात्राध्यक्ष इत्यादिषु विभिन्नेषु दायित्वपदेषु अलङ्कृताः अभवन्। एतदतिरिक्तं एकादशकक्षायाः छात्रा दिव्या दिति उपप्रधानछात्रा तथा युवराजः उपप्रधानछात्रः पदेन अलङ्कृतौ अभवताम्। द्वादशकक्षायाः समृद्धिः प्रधानछात्रा तथा प्रियम शर्मा प्रधानछात्रः इति पदेन सम्मानितौ अभवताम्।
सर्वे छात्राः स्वस्वदायित्वमनुसृत्य प्रतीकचिह्नं, पट्टिकां च धारयित्वा सम्मानिताः अभवन्। ततः सर्वे सदस्याः विद्यालयस्य गौरवं रक्षितुं स्वकीयदायित्वानि निष्ठया निर्वोढुं च शपथं गृहीतवन्तः। विद्यार्थी-परिषदि चयनितानां सर्वेषां छात्र-छात्राणाम् अभिभावकानां गरिमामयी उपस्थितिः समारोहस्य शोभां वर्धितवती। प्राचार्य सह क्षेत्रीयाधिकारी एस. के. झा महोदयः नवनिर्वाचितान् परिषद्सदस्यान् सम्बोध्य नेतृत्वक्षमता, अनुशासनम्, सेवाभावः, उत्तरदायित्वबोधश्च इत्येषां गुणानां पालनाय प्रेरितवान्। विद्यालयस्य समाजस्य च आदर्शप्रतिनिधित्वाय शुभाशंसां प्रदत्तवान्।
समारोहस्य सफलसञ्चालने रफ़त जहाँ खान, मिताली मजूमदार, विनीता भारती, वीणा ठाकुर, अनुपम मिश्र, लवलीकुमारी, सुजीतकुमार मण्डल, अभिषेककुमारशर्मा, प्रगति मिश्रा, आशीष कुमार दासः, अभिनवकुमारः, अनुश्री, मिशुकुमारी, समृद्धि मण्डलः, वेवी कुमारी, मुन्नी सिंह, अश्विनी कुमारः, डॉ. घनश्यामपाठकः, वसुन्धराकुमारी, नेहाकुमारी, ममता, प्रतिमाराय चौधरी, डॉ चन्द्रहास भारती इत्यादीनां विद्यालयस्य समस्तशिक्षकशिक्षिकाणां शिक्षकेत्तरकर्मचारिणां च योगदानं प्रशंसनीयम् आसीत्।

# कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालये द्विवर्षीयस्य आचार्यपाठ्यक्रमस्य भारतीयज्ञानपरम्परया सततमूल्याङ्कनव्यवस्थया च भविष्यति परिष्कारः



**चित्रपरिचयः– आचार्यपाठ्यक्रमनिर्माणसमित्याः सभायां विषयविशेषज्ञैः प्रस्तुतस्य नूतनपाठ्यक्रमस्य अवलोकनं कुर्वन्तः समितिसदस्याः।**

हिमसंस्कृतवार्ता दरभङ्गा,डॉ० राघवनाथझा। लोकभवन- पाटलिपुत्रात् निर्गतानां निर्देशानां तथा राष्ट्रीयशिक्षानीतेः–२०२० (National Education Policy–2020) उपबृंहणेन कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालये द्विवर्षीयस्य आचार्यपाठ्यक्रमस्य प्रथम-द्वितीयसत्रयोः पाठ्यक्रमनिर्माणकार्यं प्रायः सम्पूर्णतामुपागतम्।कुलपतिना प्रो० लक्ष्मीनिवासपाण्डेयमहाभागेन अध्यक्षतायां, स्नातकोत्तरविभागाध्यक्षानां मार्गदर्शनेन, विषयविशेषज्ञैः बहुपरिश्रमेण निर्मितः अयं नूतनः पाठ्यक्रमः आगामिनि जुलाई-मासस्य चतुर्दशदिनाङ्के प्रस्तावितायां विद्वत्परिषदः सभायां अनुमोदनार्थं समुपस्थाप्यते।विद्वत्परिषदः अनुमोदनानन्तरं पाठ्यक्रमः विश्वविद्यालयस्य विविधैः प्राधिकारैः क्रमशः अनुशंसितः भविष्यति। ततः सः स्वीकृत्यर्थं बिहारराज्योच्चतरशिक्षापरिषदः, पाटलिपुत्रम् प्रति प्रेषयिष्यते। तत्र अनुमोदनं प्राप्त्वा पुनः लोकभवनं, पाटलिपुत्रम् प्रति प्रेषणं भविष्यति। अन्ते माननीयकुलाधिपतेः स्वीकृत्यनन्तरं नूतनः आचार्यपाठ्यक्रमः कामेश्वरसिंहदरभङ्गसंस्कृतविश्वविद्यालये विधिवद् प्रवर्तिष्यते।एतद्विषये विश्वविद्यालयस्य जनसम्पर्काधिकारी डॉ० निशिकान्तमहाभागः अवदत् यत् द्विवर्षीयस्य आचार्यपाठ्यक्रमस्य प्रथम-द्वितीयसत्रयोः पाठ्यक्रमः गतजूनमास एव सिद्धः आसीत्। किन्तु लोकभवनात् प्राप्तैः अद्यतनसंशोधनसम्बद्धैः निर्देशैः तस्य पुनः परीक्षणं, परिष्कारश्च आवश्यकः अभवत्। अतः सम्पूर्णः पाठ्यक्रमः पुनः सम्यक् परीक्षितः संशोधितश्च कृतः।

# "केचन मनसः मौक्तिकाः"

{१} जगति चत्वारि स्थानानि कदापि न पूर्यन्ते। समुद्रः, श्मशानः, तृष्णा, मानवचित्तं च।।
{२} "न अभिमानाय अपि तु स्वाभिमानाय केचन जनाः त्यक्तव्याः।।"
{३} "लवणसदृशं चरित्रं निर्मायताम्, न कश्चित त्वां बहु प्रयोक्तव्यः, न च त्वां विना कोऽपि जीवितुं शक्नोति।"
{४} "यथा यथा समयः गच्छति तथा तथा वयं प्रायः अवगच्छामः यत् अस्माभिः यः क्षणः त्यक्तः सः क्षणः श्रेष्ठः आसीत्।"
{५} "नारी प्रेम्णा राधा भवति गृहजीवने जानकी। काली भूत्वा छिन्नः शिरः, यदा सम्मानस्य विषयः आगच्छति।"

**डा वर्षा प्रकाश टोणगांवकर, पुणे, महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। गतदिनेतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। गतदिने मयैका अतिविचित्रा वार्ता श्रुता। चीनदेशे महावृष्ट्या आप्लावो जातः। तत्र एकं सर्पपालनकेन्द्रं जलमग्नं जातम्। अतः नवशतं सर्पाः पलायिताः। ततः भीतैः स्थानिकजनैः जालानां साहाय्येन ते भीषणाः सर्पाः नदीजलाद् गृहीताः।
**नन्दिनी-** अहो, एषा भीषणा वार्ता! सर्पाणां मध्ये जीवनं तु अतीव कष्टकरम्। दन्तपीडायाः वार्ता अपि मया प्राप्ता। चीनदेशे एव कश्चिद् वृद्धः दन्तपीडा-निवारणाय चिकित्सालयं प्रविष्टोऽभूत्। परन्तु तस्य दन्तचिकित्सकैः द्वादश दन्ताः बलाद् उत्पाटिताः। केवलं तावदेव न, तस्य कोषतः सर्वं धनम् अपि तैः चोरितम्। स वृद्धः हृतधनः जातः।
**काव्या-** अतिदुःखदम् एतत्! वैद्यस्तु रक्षको भवति, न तु भक्षकः। ब्राजील-देशस्य अन्या विचित्रा वार्ता अस्ति। तत्र कश्चित् पुमान् भीषण-चलच्चित्रस्य राक्षसस्य वेषं धृतवान् अस्ति। तस्माद् भीतैः जनैः आरक्षकाः आहूताः। ततः स पुमान् आरक्षकैः बन्धितः।
**नन्दिनी-** सत्यम्, विचित्रवेषधराद् जनाः भीताः स्युरेव। परं ततः परं मयैका शुभा वार्ता श्रुता। कश्चित् पुमान् सप्तवर्षाणि यावत् सञ्ज्ञाहीनावस्थायाम् अभूत्। तस्य पतिव्रतया भार्यया प्रतिदिनं पादाङ्गुल्यः दष्टाः। तेन दंशनेन तस्य नाड्यः उत्तेजिताः जाताः। ततः स पुमान् सञ्ज्ञां प्राप्तवान् अस्ति। स भार्याम् अवदत्- "अहं त्वयि स्निह्यामि" इति।
**काव्या-** अहो! पत्न्याः अगाधः प्रेमादरस्तं रक्षितवान् अस्ति। एषा वार्ता अतीव सुखदा वर्तते। गतदिनेतनं वार्तापत्रं समाप्तम्। धन्यवादः।